National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2025;** 1(61): 108-110
© 2025 NJHSR
www.sanskritarticle.com

**मनोज चंद्र परगाई**
शोधच्छात्रः, शिक्षा शास्त्र विभाग,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नई दिल्ली

**शोध-निर्देशकः-**
**प्रो.रजनी जोशी चौधरी**
पूर्व आचार्या शिक्षाशास्त्र विभाग,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नई दिल्ली

**Correspondence:**
**मनोज चंद्र परगाई**
शोधच्छात्रः, शिक्षा शास्त्र विभाग,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नई दिल्ली

# उत्तराखण्डराज्यस्य दुर्गमपर्वतीयक्षेत्रेषु शैक्षिकबाधाः

**मनोज चंद्र परगाई , प्रो.रजनी जोशी चौधरी**

**सारांश: (Abstract)**

उत्तराखण्डः हिमालयस्य क्रोडे उपविष्टः एकः मनोहरः धार्मिकप्रदेशः अस्ति। शिक्षाक्षेत्रे एषः प्रदेशः बहुभिः समस्याभिः ग्रस्तोऽस्ति, विशेषतः प्रदेशस्य दुर्गमपर्वतीयक्षेत्रेषु शैक्षिकसंसाधनानामल्पता, योग्यशिक्षकानामभावः, अन्येऽपि सामाजिकार्थिकरुढिवादितायुक्त कारकाः सन्ति यैः शैक्षिकविकासः बाधितोऽस्ति, शोधपत्रमिदं सर्वाषां बाधानां विश्लेषणं करोति तथा व्यावहारिक समाधानमपि प्रददाति ।

## 1. भूमिका (Introduction)

भारतवर्षस्योत्तरीभागे स्थितः उत्तराखण्डाख्यः प्रदेशः गढवालमण्डलः कुमाऊमण्डलश्चेति। प्रदेशस्य 86% भूभागः पर्वतीयो वर्तते। अधिकांशजनसंख्या ग्रामीणक्षेत्रेषु वसति। यद्यपि प्रदेशस्य साक्षरता प्रतिशतः 79.63 प्रतिशतः (2011 जनगणनानुसारेण) तथापि दुर्गम-क्षेत्रेषु शैक्षिकस्थितिः चिन्तायुक्ताऽस्ति। दुर्गमपर्वतीयग्रामेषु विद्यालयं प्रति गमनं दुष्करमस्ति तथा दुर्गमपर्वतीयग्रामेषु शिक्षायाः गुणवत्तापि अल्पतरा अस्ति। शिक्षामार्गे बाधकतत्त्वानां समाधानाविष्करणमावश्यक मस्ति-

## 2. शोध-पद्धतिः (methodology)

शोधोऽयं वर्णनात्मकपद्धत्याधारितोऽस्ति।यत्र समाचारलेखनं, शैक्षिकसर्वेक्षणः, शोधपत्राणामध्यय- नं कृतम् अस्ति। कतिपय विद्यालयेषु कार्यरत शिक्षकेभ्यः ग्रहीताः अनुभवाः टिप्पण्यश्च समाहिताः सन्ति ।

## 3 -शोधोद्देश्यम् (Objectives of the Study)

- दुर्गमक्षेत्राणां भौगोलिकसामाजिकपरिस्थितीनामध्ययनम्।
- शैक्षिक संसाधनानामुपलब्धतात्राः विश्लेशणम् ।
- शैक्षिक बाधानामन्वेषणं समाधानञ्च ।
- राज्यसर्वकारस्य योजनानां प्रभावशीलतायाः मूल्यांकनः।

## 4- दुर्गमक्षेत्राणां विशेषताः-

उत्तराखण्डराज्यस्य अधिकांशग्रामाः 2000 मीटरतः अधिकोच्च स्थानेषु स्थिताः सन्ति। अधिकांशग्रामान् यावत् गमनाय लघुमार्गाणां, वनानां, उच्चावच्चमार्गाणां सहायतावश्यकी। वर्षाकाले तु मासं यावत् विद्यालयाः वितपिहिताः एव भवन्ति ।

## 5. प्रमुख-शैक्षिकबाधकः –

### 5.1 भौगोलिकं बाधाः

अधिकांशपर्वतीयविद्यालयं यावत् गमनं दुष्करमस्ति। अतिवृष्टिः हिमपातः, भूस्खलनेनापि विद्यालयगमने समस्यायाति। परिवहनाभावे छात्राः पद्भ्यामेव किलोमीटरमितं यावत् गच्छति।

**5-2 अधोसंरचनायारभावः**

प्राथमिक माध्यमिक विद्यालयेषु भवनानां स्थितिरिति दयनीया वर्तते। पर्याप्त कक्षाणामप्यनुपलब्धतैव। शौचालय-पुस्तकालय-पेयजल प्रयोगशालादीनामप्यभावो दृश्यते विद्यालयेषु। क्रीडादीनामति रिक्तगतिविधीनां कृते संसाधनानामभावोऽस्ति।

**5.3 शिक्षकसम्बन्धिसमस्याः**

योग्यशिक्षकाणामभावः। नियुक्तशिक्षकाः स्थानान्तरणाय प्रयत्न-शीलाः अथवा नियमितानुपस्थिताः दृश्यन्ते। विषयानुसारेण विषयविशेषज्ञाः अपेक्षिताः भवन्ति परन्तु विद्यालयेषु एकैवाध्यापकः सर्वविषयान

**5.4 सामाजिकार्थिककारकाः**

निर्धनपरिवारस्य बालकाः स्वजीविकोपार्जनाय शिक्षां विहाय गृहकार्येषु,अन्यत्र कार्येषु वा गच्छन्ति। कतिपयसमुदायेषु बालिकाशिक्षां प्रत्यवधानं नगण्यम् अस्ति। सामाजिककुप्रथाः जागरुकताभावश्चापि शिक्षायां बाधको भवति ।

**5.5 डिजिटलशिक्षासम्बन्धिबाधाः**

**Covid-19** इति महामारेरनन्तरम् अन्तर्जालीयशिक्षायाः महत्त्व-मधिकमभवत्। परञ्चाति दुर्गमक्षेत्रेषु अन्तर्जालस्याभावे शिक्षा बाधिता भवति

**शिक्षासम्बन्ध्युपकरणानामप्यभावोऽस्ति। यथा-**

- लैपटाप, स्मार्टफोन इति ।
- विद्युतः नियमितापूर्तेरभावोऽपि एका समस्याऽस्ति पर्वतीय क्षेत्रेषु ।

**6- सर्वकारस्य अन्यसंस्थानां प्रयासः -**

**सर्वकारीययोजनाः-**

- सर्वशिक्षाभियानम्
- मध्याह्नभोजनयोजना
- राष्ट्रीयमाध्यमिकशिक्षाभियानम् (RMSA)
- समग्रशिक्षाभियानम्
- बालिकाशिक्षाप्रोत्साहनयोजना

**सर्वकारीयप्रयासानां सीमा-**

- योजनानां कियान्वयनं धरातलस्तरे नाऽस्ति ।
- योजनालाभे विलम्बः भ्रष्टाचारश्चाप्येका गूढा समस्या। दूरस्थविद्यालयेषु सर्वकारीयदृष्टेरभावः।

**7- समाधानाः दिशा-निदेशाश्च-**

- स्थानीययुवकानां नियुक्तिभर्वेत् ये हि शिक्षकरूपेण स्वदीर्घकालिकसेवाः कुर्युः।
- प्रतिकूलपर्यावरणकाले आपदास्थितौ वा वैकल्पिकी व्यवस्था भवेत्।
- सौर-उर्जाधारित कक्षाणा निर्माणं भवेत् येन विद्युत्-समस्यायाः निदानं भवेत्।
- ग्रामस्तरे समितयः गठिताः स्युः याः समितयः विद्याल यानामवलोकनं कुर्युस्तथा समस्यानां समाधानमपि।
- आनलाइन शिक्षायाः कृते सामुदायिकडिजिटलकेन्द्राणां स्थापना भवेत्।
- शिक्षकाणां नियमितोपस्थितेः कृते GPS अथवा वायोमेट्रिक-प्रणालेरुपयोगः भवेत्।
- विद्यालयं यावत् गमनाय सुरक्षितमार्गनिर्माणं भवेत्।
- शिक्षां प्रति रुचिजागरणाय नाटकपोस्टरादि सामुदायिक सभाः आयोजिताः स्युः।
- NGO तथा निजीक्षेत्रस्य भागीदारी अधिका भवेत्।
- शिक्षकाः शिक्षणकार्यानियुक्ताः भवन्ति अतस्तेषां कृते शिक्षणाति-रिक्तकार्यदायित्वं न भवेत्। अधिकांश-शिक्षकाः अन्यविभागीय-दायित्वनिर्वाह एव संलग्नाः भवन्ति येन नियमितशिक्षणकार्यं बाधितं भवति।

**8- निष्कर्षः-**

उत्तराखण्डराज़्यस्य दुर्गमपर्वतीयक्षेत्रेषु शिक्षायामनेकाः बाधाः सन्ति। यदि सर्वकारः, समाजः, संगठनाः,स्थानीय प्रशासनः सर्वे मिलित्वा परस्परं कार्यं कुर्युः चेत् बाधानां निराकरणं कर्तुं शक्यते। आवश्यकमेतत् यत् शिक्षा एकः अधिकारः एव नापितु शिक्षा सामाजिकपरिवर्तनस्योपकरण-मस्तीति स्वीकरणीयम् ।

**9- सन्दर्भग्रन्थाः-**

**पुस्तकें (Books)**


- प्रो. एस.पी. वर्मा – भारतीय शिक्षा प्रणाली: इतिहास, समस्याएँ व समाधान, विश्वविद्यालय प्रकाशन।
- मिश्र, लक्ष्मीकांत – हिमालयी क्षेत्र की समस्याएँ और समाधान, उत्तरायण पब्लिकेशन, नैनीताल।

**सरकारी व संस्थागत रिपोर्टें (Govt. & Institutional Reports)**

- उत्तराखण्ड राज्य शैक्षिक सर्वेक्षण रिपोर्ट (Uttarakhand Education Survey Report) – शिक्षा विभाग, उत्तराखंड सरकार, 2019।
- DISE (District Information System for Education) Reports, 2016–2022 – NUEPA, भारत सरकार।
- Annual Status of Education Report (ASER) – Pratham Foundation, विशेषतः उत्तराखंड के जिलों हेतु।
- U-DISE+ Report – Uttarakhand Region (2020–21) – MHRD, भारत सरकार।
- National Education Policy 2020 (NEP) – MHRD, भारत सरकार।
- उत्तराखण्ड राज्यशैक्षिकरिपोर्ट इति (SCERT 2023)
- The Unified District Information System for Education (UDISE) 2022-23
- भारतसर्वकारस्य शैक्षिक योजनाः
- शिक्षसम्बन्धित समाचाराः लेखाश्च (The Hindu, Amar Ujala, Hindustan Times)
- क्षेत्रीय रिपोर्ट इति तथा शिक्षकाणां संवादः।

**शोध पत्र/जर्नल लेख (Research Papers/Journal Articles)**

- "Educational Challenges in Hilly Regions of Uttarakhand" – International Journal of Research in Social Sciences, Vol. X, Issue 5, 2020.
- "Problems of School Education in Remote Areas of Uttarakhand" – Journal of Education and Practice (UNESCO affiliated), 2019।

**थेसिस एवं शोध प्रबंध (Thesis/Dissertations)**

- "उत्तराखण्ड में प्राथमिक शिक्षा की चुनौतियाँ" – शोध प्रबंध, हेमवती नन्दन बहुगुणा गढ़वाल विश्वविद्यालय, श्रीनगर।
- "Effect of Geographical Barriers on Girls' Education in Kumaon Region" – Ph.D. Thesis, Kumaun University, Nainital।